श्री सायिबाबा प्रार्थनाष्टकं

श्री सायिबाबा प्रार्थनाष्टकं

शांतचित्ता महाप्रज्ञा सायिनाथा दयाघना |
दयासिंधो सत्स्वरूपा मायातमविनाशक || 1 ||

जातिगोत्रातीतसिद्धा अचिंत्यकरुणालया |
पाहि मां पाहि मां नाथा शिर्डी ग्रामनिवासया || 2 ||

ज्ञानसूर्य ज्ञानदाता सर्वमंगळकारका |
भक्तचित्तमराळस्त्वं शरणागतरक्षका || 3 ||

सृष्टिकर्ता विधाता त्वं पाता त्वं इंदिरापतिः |
जगत्रयं लयं नेता रुद्रस्त्वं सुनिश्चितं || 4 ||

वसुधायां वित्तस्थानं कुत्र नास्ति त्वया विना |
सर्वज्ञस्त्वं सायिनाथ सर्वेषां हृदये असि || 5 ||

सर्वापराधान् क्षमस्व त्वं इयं मे अस्ति याचना |
अभक्तिसंशययोः लहरी शीघ्रं शीघ्रं निवारय || 6 ||

त्वं धेनुः बालवत्सोहं चंद्रश्चंद्रमणिस्तथा |
गंगासदृश त्वत्पादान् सादरं प्रणमाम्यहं || 7 ||

निधेहि शिरसि मे त्वं कृपयाः करपंजरं |
शोकचिंतापहर त्वं गणो हि किंकरस्तवः || 8 || [गणुरेषः] ||इति श्री सायिनाथ प्रार्थनाष्टकं||